अन्वारम्भयित्वा (anvārambhayi-tvā) *ger.* (irr.) **1** having caused to touch from behind कृष्णं वासो यजमानं परिधापयित्वान्वारम्भयित्वैतानि जुहोति KāṭhS. 11.10 (i.156.16); सजातानेवास्मा उपदधात्यामनस्य देवा इत्यन्वारम्भयित्वा जुहोति KāṭhS. 12.2 (i.164.6) पत्नीमन्वारम्भयित्वा निर्वपति KāṭhS. 24.8 (ii.98.13); KapiKaS. 38.1 (204.6); BhārŚS. iii.8.11; यां कामयेत भार्याम् ... तस्या औपासने प्रतिहितमन्वारम्भयित्वा प्रजापते न त्वदेतानीति HirŚS. xiii.6.33 (182.30); अन्वारम्भयित्वा हवनम् VārāGS. 3.14; यदरण्योः समारूढः स्यान्निवर्तमाने प्रेतमन्वारम्भयित्वैतं मन्त्रं जपेत् HitPiMe. ii.8.3; **2** having caused to hold on निर्वपणकाले पत्नीं शकटमन्वारम्भयित्वातिथ्यं निर्वपति ĀpaŚS. x.30.5.

अन्वारम्भविच्छेद (anvārambha-viccheda) *m.* break in the act of touching or holding from behind ज्योतिष्टोमे अध्वर्युं प्रस्तोताऽन्वारभते प्रस्तोतारमुद्गाता ... इत्यादिक्रमेणान्वारभ्य ... क्वचिदुद्गातृप्रतिहर्त्रोः क्रमेण अन्वारम्भविच्छेदः स्यात् UpaParā. 5.16.

अन्वारम्भविधान (anvārambha-vidhāna) *n.* injunction of initiatory rite अध्वर्युकर्तृकत्वाभावेऽप्यन्वारम्भविधानेनाध्वर्योः ... आह्वानं प्रति ... आह्वयतीत्यर्थप्रतीतेस्तस्य ... अनुवाद एव MīmāKau. ii.237.3 (*on* iii.2.6)

अन्वारम्भादि (anvārambhādi) *adj.* act of touching or holding on etc. अन्वारम्भानुकूलास्थितिनिष्ठव्यापाराश्रयतया कर्तृत्वोपपत्तेरस्थिभिरेवान्वारम्भादि कार्यम् BhāṭṭDī. iii. 230.6 (*on* x.2.18)

अन्वारम्भानुकूल (anvārambhānukūla) *adj.* conducive to the act of touching or holding on तत्रास्थ्नामेव शुक्रान्वारम्भादावचेतनानामपि ... अन्वारम्भानुकूलास्थितिनिष्ठव्यापाराश्रयतया कर्तृत्वोपपत्तेः BhāṭṭDī. iii. 230.5 (*on* x.2.18); आत्मनश्च कर्तृत्वं अन्वारम्भानुकूलकृत्याश्रयत्वेनैव BhāṭṭDī. iii. 230.10 (*on* x.2.18); iii. 230.12 (*on* x.2.18)

अन्वारम्भेष्टि (anvārambheṣṭi) *f.* initiatory rite or sacrifice रयिमन्तौ पुष्टिमन्तौ पवमानहविःषु वीतवन्तावन्वारम्भेष्ट्याम् BaudhŚS. iii.39.9; चतुर्होतारं सारस्वतौ, होमावन्वारम्भेष्टिमित्येतदुपवसथे कुर्यात् BaudhŚS. iii.40.13; iii.200.17.

अन्वारभ्य (anvārábh-ya) *adj.* which is grasped or taken hold of ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू उर्नान्वारभ्या इति TaiS.VI.iii.8.1

अन्वारभ्य (anvārabh-ya) *ger.* having touched, taking hold of, cf. **अन्वन्वारभ्य.**

अन्वारिरीप्स (anv-ārirīpsa-) *desid.* to wish to hold or catch स यथा वारणम् ... अन्वारिरीप्सेतैवं ह वा एतां देवतां उद्धुतां अन्वारिरीप्सन्ते VādhūŚS. iv.28.2.

अन्वारुह् (anv-āruh-) I.U. **1A** to ascend or climb after यज्ञं यन्तं मनसा बृहन्तमन्वारोहामि तपसा सयोनिः AV. vi.122.4; AV.(P.) ii.60.1; यावानेव यज्ञस्तमन्ततोऽन्वारोहति TaiS. V.iv.10.2; स्वं वा एतदिष्टमन्वारोहति MaiS.i.8.6 (i.124.6); इष्टका स्वर्गो लोको मनसा त्वान्वारोहामि MaiS. ii.7.16 (ii.99.4); KāṭhS. 39.3 (iii.121.3); ĀpaŚS. xvi. 23.10; HirŚS. xi.2.31 (58.8); स्वर्गं वा एष लोकमन्वारोहति MaiS. iii.5.5 (iii.59.1); JaimiBr. 3.277; अन्येऽस्य लोकमन्वारोहन्ति MaiS. iii.9.4 (iii.119.10) अन्ये लोकमन्वारोक्ष्यन्ति MaiS. iii.10.2 (iii.132.1); iv.7.5 (iv.99.4); सं रश्मीन्कुलायं कृत्वान्वारोहत् MaiS. iv.3.4 (iv.43.8); तान् असुरा ओ वा इत्येवान्वारोहन् JaimiBr. 1.123; दक्षिणेन पदा नावं अधिष्ठायाथोत्तरेणान्वारोहति VādhūŚS. iii.39.17; इष्टका स्वर्गो लोका वाचा त्वन्वारोहामि VaikhāŚS. 18.17 (273.20); 18.17 (273.21); अन्वारोहद्धृषीकेशः केतुः सर्वधनुष्मताम् MahāBhā. x.13.5; (*caus.*) to cause to ascend after अन्येऽस्य लोकमन्वारोहयेयुः MaiS. iii.9.4 (iii.119.9); अथ शरीरमन्वारोहयति MaiS. iii.10.4 (iii.134.11); **1B** to ascend subsequently पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरम् TaiS. VII.ii.1.2; VII.iv.3.2; VII.iv.7.2; एकविंशात्प्रतिष्ठाया ऋतूनन्वारोहति TaiS. III.ix.9.1; ŚatBr. XIII. iii.2.1; गर्गत्रिरात्रेण ... वसून्रुद्रानादित्यानन्वारोहति ĀpaŚS. xxii.15.1; **1C** to follow in ascending (especially the funeral pyre) तं चिताग्निस्थम् ... मद्रराजात्मजा ... अन्वारोहत् MahāBhā. i.116.31; राजा ममारासौ सपत्नजित्। अन्वारुरोह तं देवी चितास्थं भूपतिं पतिम् ViṣṇuP. iii.18.61; **2A** to mount or ascend on (for chanting) यो वै पवमानानामन्वारोहान् विद्वान् यजतेऽनु पवमानानारोहति TaiS. III.ii.1.1; BaudhŚS. ii.161.12 (*but* Sāy. अनुक्रमेण प्राप्नोति); **2B** to mount on or cart etc. after (someone), to join in ascending or climbing एष वा अग्नेरन्वारोहस्तेनैवैनमन्वारोहति TaiS. V.iv.10.2; V.vi.8.1; एष वै देवयानः पन्थास्तमेवान्वारोहन्ति TaiS. VII.ii.1.4; यानमध्वन्युक्तोऽन्वारोहेत् HirŚS. xxvi.2.100 (38.9); ĀpaDS. i. (2). 8.12; आतिष्ठत रथं शौरिः ...। अन्वारुरोह दाशार्हं विदुरः MahāBhā. v.92.15; सः रथे ... विबभौ ...। अन्वारोहतु: (v.l. अन्वारुरुहतुः) पार्थं युयुधानजनार्दनौ MahāBhā. vii.60.18; अन्वारोहन्त संहृष्टा (v.l. अन्वारुरोह संसृष्टा) गजवाजिरथान्द्रुतम्। प्रणम्य रावणम् Rāmā. vi.920* (1); **2C** to mount for (overlordship) वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्नारोहन्तु तानन्वारोह साम्राज्याय AitBr. 39.4 (940); 38.1 (929); AitĀ. V.i.4.17; तानहमन्वारोहामि राज्यायेति ŚāṅkhāĀ. 1.7(4.2); ŚāṅŚS. xvii.16.2; **3** (*caus.*) to lead into, to enter in to यद्धुत आदध्यात् रुद्रं गृहानन्वारोहयेत् TaiS. III.iv.10.4; BaudhŚS. ii.186.10; **4** to ascertain or admit, cf. **अन्वारुह्य3**; **5** to use or establish, cf. **अन्वारूढ 4**; **6** (*caus.*) to place behind, cf. **अन्वारोप्य**; **7** to mount, i.e. to control, cf. **अन्वारोह 2.**

अन्वारुह्य (anvāruh-ya) *ger.* **1** having ascended or climbed विषमगताया गुरवे नाभिवाद्यम्। अन्वारुह्य वाभिवादयीत HirŚS. xxvi.4.48 (63.6); ĀpaDS. i(4).14.16; VīraMi. (Saṁskāra.) 464.7; **2** having descended अन्वारुह्य आरुह्य अवरुह्य वा VīraMi.(Saṁskāra.) 464.11; **3** having ascertained or admitted अन्वारुह्योक्तमेतद्ध विधिवाक्यप्रकीर्णताम् BālaKrī. i.17.1 (*on* 1.7); अन्वारुह्य चेदमस्माभिरुच्यते Kāśi. i. 173.14 (*on* 2.209; न च तत्सिद्धिमभ्युपगच्छतस्तदनादरवादव्याघातः तस्यान्वारुह्य कृतत्वात् ŚrutaPra. iA.26.16 (*on* i.1.1); अविरोधपक्षस्य (च) बुद्धिस्थत्वात् तस्य चान्वारुह्योक्तस्य च समुच्चयः ŚrutaPra. iA.96.16 (*on* i.1.1); जाठरलिङ्गाभावेन(वे?) ... परमात्मपरत्वं सिध्यतीत्यन्वारुह्य दर्शितं जैमिनिमतम् ŚrutaPra. iB.347.20 (*on* i.2.29); सांख्यागमानामापातप्रतिपन्नार्थमात्रपरत्वमन्वारुह्य सूत्रकारैस्तन्निरसनं युक्तम् ŚrutaPra. ii.336.4 (*on* ii.2.42); सविकल्पकेन सप्रकारं गृह्यते ...। इदं चान्वारुह्य वचनम् NyāyKu.133.5; परमतेन भोक्तृत्वमन्वारुह्योच्येत ŚatDū. 149.1; तेनान्वारुह्य तत्तत्समधिकगणना स्वीकृता TattvMu. 4.132.

अन्वारुह्यवचन (anvāruhya-vacana) *n.* bold statement of ascertainment or admittance (which admits other's view) अन्वारुह्यवचनमिदं यद्यपि विधिस्तथाप्यर्थवत्ता परिमाणतः .. फलविशेषात् ŚābaBh. 130.3 (*on* i.2.17); 1763.8 (*on* ix.3.40); इदंचान्वारुह्यवचनमिति नातीवादरणीयम् Kāśi. i.46.22 (*on* 1.911/2); विगानं विवृणोति कैश्चिदिति। इदं चान्वारुह्यवचनम्। Kāśi. i.131.19 (*on* 1.2.133); एतद्यान्वारुह्यवचनमपेक्ष्य भेदात् त्वविरोधो दर्शितः Kāśi. ii.180.24 (*on* 5.219)

अन्वारुह्यवाद (anvāruhya-vāda) *m.* bold proposition of ascertainment or admittance 'कामं देशा एव भिन्नाः' इति भाष्यमन्वारुह्यवादः NayaVi. 241.5 (*on* i.1.8); एतद्यान्वारुह्यवादमात्रम् TantrRā. 179.3; अन्वारुह्यवादो देवतानिरासोक्तिः स्यात् ŚrutaPra. iA.26.12 (*on* i.1.1); सर्वोऽयमन्वारुह्यवादो जैमिनेरुपन्यस्य निरस्यते SiddhāSi. i.37.20; अन्वारुह्यवादेनाह भवत्विति YuktiSneha. 51.28 (*on* i.1.5); अन्वारुह्यवादेन तावत्परिहरति YuktiSneha. 99.37 (*on* i.1.5)

अन्वारुह्यवादत्व (anvāruhyavāda-tva) *n.* the state of being bold proposition of ascertainment न च तत्सिद्धिमभ्युपगच्छतस्तदनादरवादव्याघातः ... कथमन्वारुह्यवादत्वनिश्चयः ŚrutaPra. iA.26.16 (*on* i.1.1); तस्यान्वारुह्यवादत्वाद्वानित्यसंयोगनिरासेन वेदप्रामाण्ये ... तात्पर्यातिशयात् SiddhāSi. i.36.2; न च देवतानिरासो जैमिनेरतात्पर्यादन्वारुह्यवादत्वाद्वा तदभ्युगमेन न विरोध इति युक्तम् SiddhāSi. i.44.1; ब्रह्मसूत्रेषु 'धर्मं जैमिनिः' इत्यादेः पूर्वपक्षस्य निरसनीयस्यान्वारुह्यवादत्वमुक्तम् SiddhāSi. i.48.5.

अन्वारूढ (anv-árūḍha) *adj.* [*f.* –ā] **1** mounted by, i.e. controlled by अयं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्याति ŚatBr.XIV.vii.1.42; BṛĀraU.iv.3.35; BrahmSūBh. (Bhā.) 70.10. (*on* i.3.42); सः प्राज्ञेन परेण आत्मना ... अन्वारूढः अधिष्ठितः BṛĀraUBh. 595.10 (iv.3.35); BṛĀraUBhVā. iv.3.1919; अन्वारूढोऽधिष्ठितः VedāntaKa. 195.1 (*om* i.3.14); VedāntKau. 113.17 (*on* i.3.43); **2A** who has mounted on or upon cart etc. after (some one), who has joined in ascending or climbing अन्वारुयेहतुः (v.l. अन्वारूढौ ततः) पार्थं युयुधानजनार्दनौ MahāBhā. vii.60.18; कर्णः ...। अन्वारूढस्तव पुत्रं रथस्थम् ... प्राविशत्स्वं स सैन्यम् MahāBhā. vii.154.63; अन्वारूढाश्च तत्पुत्रास्तत्र तां किल राक्षसीम्। अब्रुवन्नम्ब नः किंचिद्भक्ष्यं देहि KathāSaSāg. vi.3.130; सः ... अन्वारूढेन तत्रापि सज्ञपालेन वेष्टितः RājTa. (Ka.) 8.516; **2B** who has mounted (on the lap) असावन्वारूढो मदललितचेष्टः प्रमदया PādaTā. 38.18; **2C** followed in ascending (the funeral pyre) शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा। अन्वारूढा जीवती(न्ती) च साध्वी भर्तृहिताय सा BṛhaspaSm. 194.14; 297.484; तस्य भार्या सुमित्रापि तस्यालिङ्ग्य तनुं तदा। अन्वारूढा चितां विप्राः प्राप तल्लोकमेव सा SkandP. iii(1).12.116; प्रमीते तु पितर्यन्वारूढायां मातरि पित्रैव सह सपिण्डीकरणम् CaturCin.iii(1).1653.6; या तु पतिमुद्दिश्यान्यकालेऽन्यतिथावन्वारूढा तस्याः श्राद्धं तत्क्षयतिथौ कार्यं न भर्तृतिथौ NirṇaSi. 343.17; **3A** who has admitted other's view दृष्टस्य पूरस्य कारणाभावानुपपत्त्योपरिष्टाद् वृष्टिः कल्प्यते। इदमपि चान्वारूढेनोक्तम् TātpaṬ. (U.) 392.13 (*on* 5(7).18); Kāśi.iii.167.13; **3B** which is admitted